विधीयते । [1]तेन द्वावप्युदात्तौ भवतः । शेषमनुदात्तम् । वृषणश्वस्य मेने इति समानं पूर्वेण । गौरावस्कन्दिन् इति तथैव द्वे आद्ये अक्षरे उदात्ते, शेषमनुदात्तम्[2] । अहल्यायै जार इति सुबन्तस्यामन्त्रितानुप्रवेशात् तद्वदेव स्वरः । द्वावुदात्तौ शेषमनुदात्तम् । कौशिकब्राह्मण इति [3]समस्तमामन्त्रितमाद्युदात्तं [4]तत्र पूर्ववद् [5]द्वावुदात्तौ [6]शेषमनुदात्तम् । एवं गौतमब्रुवाण इति [7]द्वावुदात्तौ शेषमनुदात्तम् । श्वः सुत्यामागच्छ मघवन् इति [8]श्वः-शब्द उदात्तः सुत्यामित्यन्तोदात्तः । [9]'सञ्ज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः' (३.३.९९/३२७६) इति क्यपो विधाने उदात्तः इति वर्तते[10] । आगच्छ इति द्वावुदात्तौ । अन्त्योऽनुदात्तः । मघवन् इति [11]पदात् परमामन्त्रितं निहन्यते ॥

## देवब्रह्मणोरनुदात्तः । (३८/३६६७)

सुब्रह्मण्यायामेव 'देवा ब्रह्माणः' इति पठ्यते, [12]तत्र पूर्वेण स्वरितस्यो[13]दात्ते प्राप्तेऽनेनानुदात्तो विधीयते । [14]देवब्रह्मणोः स्वरितस्यानुदात्त आदेशो भवति । 'देवा ब्रह्माण आगच्छत'[15] (श. बा. ३.३.१.२०) । द्वयोरपि पदयोरामन्त्रिताद्युदात्तत्वे[16] [17]शेषनिघाते चोदात्तादनुदात्तस्य [18]स्वरितः कृतस्तस्यानुदात्तो भवति ॥

## स्वरितात् संहितायामनुदात्तानाम् । (३९/३६६८)

एकश्रुतिः इति[19]वर्तते । संहितायां विषये स्वरितात् परेषामनुदात्तानामेकश्रुतिर्भवति । 'इमं मे गङ्गे यमुने सरस्वति [20]शुतुद्रि' (ऋ. १०.७५.५) । माणवक जटिलकाध्यापक [21]क्व गमिष्यसि । इमम् इत्य[22]न्तोदात्तं, मे इति [23]अनुदात्तं [24]विधिकाल एव [25]निघातबिधानात् । [26]तत् पुनः '[27]उदात्तादनुदात्तस्य स्वरितः' (८.४.६६/३६६०) इति [28]स्वरितं सम्पद्यते । तस्मात् स्वरितात् परेषामनुदात्तानां गङ्गेप्रभृतीनामेकश्रुतिर्भवति । सर्व एते आमन्त्रित[29]निघातेनानुदात्ताः । माणवक जटिलक[30] इति प्रथममामन्त्रितमाद्युदात्तं, [31]तस्य द्वितीयमक्षरं स्वरितं, ततः परेषामनुदात्तानामेकश्रुतिर्भवति । संहिताग्रहणं किम्? अवग्रहे मा भूत् । इमम् मे गङ्गे यमुने सरस्वति (ऋ. १०.७५.५) ॥

## उदात्तस्वरितपरस्य सन्नतरः । (४०/३६६९)

अनुदात्तग्रहण[32]मनुवर्तते । उदात्तः परो यस्मात् स उदात्तपरः । स्वरितः परो यस्मात् स [33]स्वरितपरः। उदात्तपरस्य स्वरितपरस्य चानुदात्तस्य सन्नतर आदेशो भवति । अनुदात्ततरः इत्यर्थः । 'देवा [34]मरुतः पृश्निमातरोऽपः' (पै. ३.३१.१) । [35]मातरः इत्यनुदात्तः । अपः इत्यन्तोदात्तः 'ऊडिदंपदाद्यप्पुम्रैद्युभ्यः' (६.१.१७१/३७१७) इति । तत्रानुदात्तयोरेकादेश [36]ओकारोऽनुदात्तः । तस्यो[37]दात्ते परभूते सन्नतर आदेशो भवति । [38]'इमं मे गङ्गे यमुने सरस्वति शुतुद्रि'

---

1. तेन नास्ति ह. 2. भवति इत्यधिकम् फ. 3. सर्वम् ग. 4. ततः परं ड. 5. द्वावुदात्तौ नास्ति ह. 6. शेषम् नास्ति ह. 7. द्वावप्यत्रोदात्तौ फ. 8. श्वः शब्दः—निहन्यते नास्ति अ. 9. सञ्ज्ञायां नास्ति क. ड. 10. श्रूयते अ. 11. पदान्तात् ड. 12. तस्य ग.फ. 13. उदात्तः प्राप्तः अ.क.ग.ह. 14. देवब्राह्मणोः ग. 15. आगच्छत आगच्छत क. ह. 16. कृते इत्यधिकम् अ. क. ग. 17. शेषस्य निघाते फ. ग. 18. स्वरित इति स्वरितस्य ग, कृतः नास्ति फ. 19. अनुवर्तते अ.क. 20. शुतुद्रि नास्ति फ.ग. 21. क्व गमिष्यसि नास्ति ग.ह. 22. अन्तोदात्तः ग. ह. फ. 23. अनुदात्तः फ. ग. 24. विधानकाले ग, विधिघात एव फ. 25. निघातात् फ. 26. तत् नास्ति ह. 27. उदात्तानुदात्तस्य ड. 28. स्वरितः क. ह. इति स्वरितं नास्ति फ. 29. °निपातेन ब. क, °निघातानुदात्ताः ड, °निघातेऽनुदात्ताः ह. 30. अध्यापक अ. क. फ. ग. जटिलक नास्ति ह. 31. तत्र ड. 32. °मिहानुवर्तते फ. 33. स्वरितः ह. 34. मारुतः ह. 35. इति पृश्निमातरः इत्योकारः ब. क. 36. इतरो ह. 37. उदात्तत्वे ह. 38. उदाहरणमिदं नास्ति फ.